| CSM – 44/19 |
| --- |
| Indian Language & Literature in Sanskrit |
| Paper – I |

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any **three** of the remaining questions, selecting at least **one** from each Section.*

## SECTION – A

1. अस्मिन् प्रश्ने विद्यमानेषु चतुर्षु विभागेषु त्रीन् विभागान् उत्तरयत : 20×3 = 60

(क) अधोनिर्दिष्टाः संज्ञाः सोदाहरणं निरूपणीयाः :

(i) सर्वनाम

(ii) प्रातिपदिकम्

(iii) गुणः

(iv) उपधा

(ख) अधोनिर्दिष्टेषु शब्देषु सन्धिं सन्धिविच्छेदं वा कुरुत :

(i) पादोदकम्

(ii) स्रष्टुराद्या

(iii) दध्योदनः

(iv) तल्लीनः

(v) यशोधनः

(vi) मम + एव

(vii) पितृ + आदेशः

(viii) सः + अहम्

(ix) मत् + नाथः

(x) ते + एव

(ग) अत्रत्यानां पदानां विग्रहवाक्यान्युल्लिख्य समासनामानि निर्दिशत :

(i) यथाशक्ति

(ii) कुम्भकारः

(iii) वीणापाणिः

(iv) सर्वोदयः

(v) पाणिपादम्

(घ) अधोनिर्दिष्टानां वाक्यानां वाच्यपरिवर्त्तनं कुरुत :

(i) पिता मां पश्यति

(ii) रामो राज्यम् अकरोत्

(iii) कुतः यूयं हसथ

(iv) शिक्षकाः छात्रान् अध्यापयन्ति

(v) जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ

2. वैदिकसंस्कृतभाषायाः वैशिष्ट्यं सोदाहरणं प्रकाशयत । 60

3. रामायणमहाभारतयोः पौर्वापर्यं वैशद्येन प्रतिपादयत । 60

4. संस्कृतकथासाहित्यमवलम्ब्य निबन्धं रचयत । 60

## SECTION – B

5. यथेच्छं **त्रयः** प्रश्नाः समाधेया : $20 \times 3 = 60$

(क) पुरुषार्थचतुष्टयमवलम्ब्य प्रबन्धं प्रणयत ।

(ख) भारतीयधर्मशास्त्रोक्तदिशा संस्काराणां स्वरूपं विवृणुत ।

(ग) अर्थशास्त्रीयविषयान् संक्षेपतः प्रकाशयत ।

(घ) भारतीयायुर्वेदस्य महत्त्वं प्रकाशयत ।

6. पातञ्जलयोगदर्शनमधिकृत्य निबन्धं रचयत । 60

7. भारतीय नास्तिकदर्शनान्यधिकृत्य प्रायेण त्रिशतशब्दैः प्रबन्धं लिखत । 60

8. अधोनिर्दिष्टं गद्यांशमवलम्ब्य कृतान् प्रश्नान् संस्कृतभाषायामुत्तरयत : 

$12 \times 5 = 60$

कश्चिद् राजा स्वीयं भाग्यं ज्ञातुं स्वजन्मपत्रिकां कश्चित् ज्योतिषं प्रादर्शयत् । "भो राजन् ! त्वमेव त्वदीयानां सर्वेषामपि बन्धूनां प्रेतकृत्यं करिष्यसि" इति तद्वचनं श्रुत्वा स राजा तं ज्योतिषं कारागृहे न्यक्षिपत् । राज्ञः भाग्यगणनार्थं कश्चिदन्यो ज्योतिषः मन्त्रिणा राज्ञः समीपे आनीतः । राज्ञः जन्मपत्रिकां वीक्ष्य "भो राजन् ! त्वं दीर्घायुरसि । सर्वासां तव ज्ञातीनां जीवनावधेरपि दीर्घतरः तव जीवनावधिः" इति राजानमकथयत् द्वितीयो ज्योतिषः । एतच्छ्रुत्वा राजा तं धनेन उपहारादिभिश्च अभ्यनन्दत् । अत एवोक्तम् — सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।

(क) राज्ञः समीपे ज्योतिषः किमर्थमागच्छत् ?

(ख) किमर्थं राजा प्रथमं ज्योतिषं कारागृहे न्यक्षिपत् ?

(ग) मन्त्री किमकरोत् ?

(घ) द्वितीयो ज्योतिषः किमर्थं पुरस्कृतः ?

(ङ) सत्यभाषणं कथं कर्त्तव्यम् ?